# वेदरामायणयोः ऋषिविमर्शः

**डॉ. माया वर्मा**
सह आचार्या, संस्कृतविभागः
इंद्रप्रस्थ महिला महाविद्यालयः, दिल्ली

वेदानां प्रमुखसंहितासु ऋग्यजुस्सामाथर्वसु पूर्वमन्त्राणाम् ऋषि-देवता-छन्दसां निर्देशः उपलभ्यते। सामान्यतया मन्त्राणां द्रष्टा अथवा स्तुतीनां प्रयोक्ता ऋषिः[1], मन्त्राणां प्रतिपाद्यविषयः देवता[2] एवञ्च अक्षराणां विविधपरिमाणाः छन्दांसि[3] कथ्यन्ते।

ऋग्वेदस्य अध्ययनेन ज्ञायते यत् ऋषयः स्वसजीवस्तुतिभिः देवतानामव्यक्तशक्तीः व्यक्तरूपेण प्राकटयन्। ईदृशाः अंशाः नैकेषु मन्त्रेषु उपलभ्यन्ते। ऋषितत्त्वस्य अध्ययनदृष्ट्या ऋग्वेदस्य निम्नमन्त्रांशाः द्रष्टव्याः –

**(क) येचिद्धि त्वामृषयःपूर्व ऊतयेजुहूरेऽवसेमहि। (१.४८.१४)**

**(ख) इन्द्रमिद् हरी वहतोऽप्रतिधृष्टशवसम्।**
**ऋषीणां च स्तुतीरुपयज्ञं च मानुषाणाम्॥ (१.४८.२)**

**(ग) ऋषि हवदूतये। (१.१०६.६)**

**(घ) स्तोता वामश्विनावृषिःस्तोमेन प्रतिभूषति। (५.७५.१)**

**(ङ) पुरा नूनं च स्तुतय ऋषीणाम्। (६.३४.१)**

**(च) यःपूर्व्याभिरुत नूतनाभिर्गीर्भिर्वावृधे गृणतामृषीणाम्। (६.४४.१३)**

**(छ) ये च पूर्वऋषयो ये च नूत्ना। इन्द्र ब्रह्माणि जनयन्त विप्राः॥ (७.२२.९)**

**ऋषितत्त्वस्य परिभाषाः–**

ऋषितत्त्वस्य द्वे परिभाषे प्राप्येते। प्रथमा परिभाषा ऋषयो मन्त्रद्रष्टारः[4] अर्थात् ऋषयः ते सन्ति यैः समाधेरलौकिकस्थितौ मन्त्राः अवलोकिताः। निरुक्ते यास्कः ऋषिशब्दस्य व्युत्पत्तिं कुर्वन् औपमन्यवाचार्यानुसारेण कथयति यत् ऋषिः शब्दः दृश् धातोः निष्पद्यते, यतोहि ऋषयः मन्त्रान् ददृशुः[5], निरुक्ते एव एकमुद्धरणमुपलभ्यते तदनुसारेण ऋषिशब्दः गत्यर्थक[6] ऋष् धातोः निष्पद्यते। अस्मिन् उद्धरणे[7] कथ्यते यत् " तपस्यायां रतानामृषीणां पार्श्वे

मन्त्राः गताः तान् च प्राप्नुवन्। ”

शतपथब्राह्मणे ऋषिशब्दः रिष् धातोः निष्पद्यते। तत्र च उच्यते –

**“ते यत्पुरास्मात्सर्वस्मादिदमिच्छन्तःश्रमेण तपसा रिषन्त तस्मादृषयः।”**[8] अत्र रिष् धातोः अर्थः तपश्चर्या। ऋषिशब्दः दृश् धातोः रिष् धातोर्वा निष्पद्येत प्रत्येकस्यां स्थितौ एतच्छब्दस्य अभिप्रायः प्रतीयते यत् ऋषयः ते सन्ति यैः तपस्यारतैः समाधौ मन्त्राः दृष्टाः। मन्त्रदर्शनं लौकिकस्तरे अथवा बुद्धावगमनाय मन्त्रप्रणयनं कथ्यते। ऋषीणामसाधारणविशेषतां स्पष्टयन् यास्कः निरुक्ते प्रथमाध्याये कथयति यत् ऋषिभिः धर्मस्य (मन्त्रस्य) साक्षात्कारः कृतः। समाधौ अलौकिकस्थितिषु दिव्यचक्षुर्भिः प्रत्यक्षं कृतम् –

**“साक्षात्कृतधर्माणःऋषयो बभूवुः”**[9]

निरुक्तस्य अस्याः पङ्क्त्याः व्याख्यां कुर्वन् स्कन्दस्वामी स्वभाष्ये स्पष्टरूपेण कथयति। अत्र धर्मशब्दस्य प्रयोगः वैदिकमन्त्राणां कृते कृतः। तस्य व्याख्यायाः अभिप्रायो वर्त्तते यत् अतीन्द्रियमसंवेद्यञ्च धर्मस्वरूपं कस्मिन्नपि विशिष्टस्वरूपे द्रष्टुं शक्यते अथ च तद्विशिष्टरूपविषये मन्त्रः एव भवितुं शक्यते –

**“धर्मस्यातीन्द्रियत्वात्साक्षात्करणस्यासम्भवाद्धर्मशब्देनात्र तदर्थं मन्त्रब्राह्मणम् उच्यते। तत्साक्षात्कृतोधर्मो यैस्ते साक्षात्कृतधर्माणःऋषयः”**[10]

निरुक्तस्य द्वितीयप्रमुखव्याख्याकारः आचार्यदुर्गः ऋषिशब्दं ऋष्(दर्शने) धातोः निष्पादयति। अथ च अभिप्रायं प्रकटयन् कथयति यत् यैः विशिष्टमनुष्यैः मन्त्राणाम्, नानाविधावसरेषु विविधकार्येषु प्रयोगपूर्वकं तदुभूतफलानां साक्षात्कारः कृतः, ते ऋषयः। अनेन प्रकारेण दुर्गाचार्यानुसारेण मन्त्रेभ्यः उत्पन्नानां फलानां कृते औपचारिकवृत्तिना साक्षात्कृतधर्माणः इति पदे धर्मशब्दस्य प्रयोगः कृतः –

**ऋषन्ति अमुष्मात्कर्मणःएवम् अर्थवता मन्त्रेण संयुक्ताद् अमुना प्रकारेण एवंलक्षणःफल-विपरिणामो भवति इति पश्यन्ति ते ऋषयः”**[11]

“बृहद्देवता” “अनुक्रमणी” चेत्यादिषु ग्रन्थेषु ऋषीणां कृते असकृत् मन्त्रदृक्, अपश्यत् आदिशब्दानां प्रयोगः अवलोक्यते।

ऋषिशब्दस्य द्वितीया परिभाषा अस्ति –**“यस्य वाक्यं स ऋषिः”** अर्थात् मन्त्ररूपवाक्यानां वक्ता ऋषिरस्ति। अभिप्रायो विद्यते यत् ये स्वकामनानां पूर्त्यै देवतानां स्तुतिं वाक्यैः कृतवन्तः, ते एव मन्त्राणां ऋषयः मताः। ऋग्वेदस्य

संवादसूक्तेषु नदी-पणि-सरमादीनां यद् ऋषित्वं प्राप्यते , तत्र द्वितीयपरिभाषां व्याप्य एव संवादेषु सङ्गतिः क्रियते। ये तत्र चेतनाः अचेतनाः वा प्राणिनः सन्ति , तेषामपि ऋषित्वं निर्दिश्यते। अनया दृष्ट्या एव नदी-सरमा-पण्यादीनां ऋषित्वं सुसङ्गतं भवति। द्वितीयशब्देष्वत्र ऋषिशब्दस्यार्थः वक्ता[12] विद्यते। परन्तु एतेषु स्थलेषु स्वीक्रियते यत् मन्त्रकार: तथाकथितवक्तृ-ऋषिभ्य: भिन्न: कश्चिद् अन्य: मनुष्य: वर्तते। यथा उपन्यासादीनां लेखक: भिन्न: भवति अथ च उपन्यासस्य पात्राणि भिन्नानि भवन्ति। तथैव मन्त्राणां ऋषय: क्लृप्ता भवन्ति।

उपरोक्तपरिभाषासु कथ्यते यत् देवतां प्रति स्तुतिरूपमन्त्राणां द्रष्टा प्रयोक्ता अथवा वक्ता ऋषि: भवति। येषु मन्त्रेषु देवता: न स्तुत्यन्ते अपितु कश्चन भाव:, विधि: अथवा निषेध: प्राप्यते तत्र मन्त्राणां य: प्रोक्ता स: एव ऋषि: मन्यते। अत्र द्रष्टा तथा प्रयोक्ता एतयो: पदयो: विशेषमान्तरं प्रतीयते। यदाधारेण ऋषीणां स्तरद्वयं प्राप्यते। प्रथमस्तरे आद्याः अथवा अतिप्राचीना: ऋषय: सन्ति यै: दृष्टमन्त्राणां प्रयोग: कृत:, तै: विभिन्नदेवतानां स्तुति: कृता। ते स्तुतय: आचरणे चरित्रे वा चरितार्थकृता:।[13] द्वितीयस्तरे ऋषीणां कृते निरुक्ते[14] सम्भवत: "अवर" (ऋषिः) शब्द: प्रयुज्यते।

ऋग्वेदे असकृत् ऋषिशब्दस्य प्रयोग: अग्नि:[15] इन्द्र:[16] इत्यादि देवतानां कृते उपलभ्यते। तत्र अस्य शब्दस्य अर्थ: अतीन्द्रियार्थद्रष्टा, अलौकिकदृष्टिसम्पन्न:, क्रान्तद्रष्टा, सर्वज्ञ: क्रियते। मन्त्राणां रचयिता, वक्ता अथवा कर्त्रादीनां दृष्ट्या ऋषय: स्तोता मन्त्रकृत्[17], कवि:[18] इत्यादि शब्दै: अपि उच्यन्ते।

**ऋषीणां प्रतीकात्मकनामानि–**

वैदिकशब्देषु प्रतीकात्मकताया: अथवा यौगिकताया: कारणेन एव एकदेवताया: वाचकशब्दा: द्वितीयदेवतावाचकशब्दानां कृते विशेषणरूपेण वेदेषु प्रयुज्यन्ते। यथा उष:शब्दस्य कृते इन्द्रतमा अथ च अश्विनो: कृते इन्द्रतमा मरुत्तमा[19] विशेषणरूपेण प्रयुज्यन्ते।

अनेन प्रकारेणैव ऋषिवाचकनामसु देवतावाचकशब्दानां विशेषणरूपेण प्रयोग:[2] तथा च देवतावाचकशब्देषु ऋषिनामानि विशेषणरूपेण प्रयुज्यन्ते। एतासु सर्वासु स्थितिषु स्पष्टरूपेण प्रमाणीक्रियते यत् वेदस्य शब्दा: कस्याश्चिद्देवताया: प्रतीकानि अथवा ऋषीणां प्रतीकानि भवन्ति।

**ऋषीणां भिन्नत्त्वम्–**

वेदेषु अनेकमन्त्रेषु बहुश: ऋषिनामानि उपलभ्यन्ते। ऋग्वेदस्य बहव: मन्त्रा: त्रिषु वेदेषु यजुस्सामाथर्वसु पठिता: सन्ति। परन्तु एतेषां मन्त्राणां ऋषिनामानि ऋग्वेदस्य मन्त्राणां ऋषिनामभ्य: पृथक्सन्ति। अथर्ववेदे तु ऋग्वेदस्य शताधिकमन्त्राणाम् ऋषित्वं ब्रह्मा अथवा अङ्गिरा इत्यादिभिः नामभि: ख्याप्यते। अस्मिन् सम्बन्धे एषा सम्भावना

क्रियते यत् वैदिकमन्त्राणां ऋषिनाम्ना सम्बन्धे काचित् सुनिश्चिता परम्परा न विद्यते। अनेन कारणेन एव अनुक्रमणिषु तथा च ब्राह्मणग्रन्थेषु ऋषिनामविषयकोल्लेखेषु परस्परं विरोधः दृश्यते।

अस्मिन् सम्बन्धे शुक्लयजुस्संहितायाः सर्वानुक्रमसूत्रस्य अंशः उदाहरणरूपेण द्रष्टव्यः - **इषे त्वादि खं ब्रह्मान्तं विवस्वान् अपश्यत्।** ततः प्रतिकर्मविभागेन ब्राह्मणानुसारेण ऋषयो वेदितव्याः।[21] अर्थात् सम्पूर्णयजुर्वेदस्य मन्त्राणां दर्शनम् विवस्वता कृतम्, तस्य पश्चात् विविधयागकर्मदृशा ब्राह्मणग्रन्थानुसारेण ऋषित्वस्य निर्णयः करणीयः।

वेदानां अनेकमन्त्राणां सूक्तानां वा सम्बन्धे अग्न्यादिदेवताः, याः देवताः अन्येषु मन्त्रेषु स्तोतव्याः सन्ति ताः एव ऋषयः मन्यन्ते। सम्वादसूक्तेषु तु वक्तुं शक्यते यत् यस्य मुखात् मन्त्रस्य उच्चारणं क्रियते तस्य मन्त्रस्य सः एव ऋषिः मन्यते –**"यस्य वाक्यं सः ऋषिः"** शतपथब्राह्मणस्य एकस्याम् आख्यायिकायां कथ्यते यत् प्रजापतिः तिस्र ज्योतीः अतपत् अपि च ताभ्यः एव तेन त्रयाणांवेदानां उत्पत्तिः कृता। अग्नेः ऋग्वेदः, वायोः यजुर्वेदः, सूर्याच्च सामवेदः प्रकटितः।[22] मनुस्मृतावपि अग्निवाय्वादित्यैः वेदत्रयस्योत्पत्तेः विवेचनमुपलभ्यते।

**अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।**
**दुदोह यज्ञसिध्यर्थमृग्यजुःसामलक्षणम्॥**[23]

**ऋषिदयानन्दस्य दृष्टौ अग्न्यादिदेवतानाम् ऋषित्वम्** –

स्वामिनो दयानन्दस्य, शतपथब्राह्मणः मनुस्मृतेश्च उपरिनिर्दिष्टोद्धरणानाम् आधारेण मतमिदं वर्तते यत् "सृष्ट्यादौ परमात्मना अग्निवाय्वादित्याङ्गिरर्षीणाम् आत्मसु एकैकस्य वेदस्य प्रकाशः कृतः।"[24]

श्वेताश्वेतरोपनिषदः एकस्मिन् मन्त्रे स्पष्ट्यते यत् "ब्रह्मणः आत्मनि अग्न्यादि द्वारा वेदस्य स्थापना कृता"[25] मन्त्रैः सूक्तैश्च सह ये ऋषयः उपलभ्यन्ते तस्मिन् विषये स्वामिमहोदयानां विचारः विद्यते यत् ते मन्त्राणां मूलद्रष्टारः न सन्ति यतो हि तेभ्यः पूर्वमपि ब्रह्मादिभिः वेदानाम् अध्ययनं श्रवणं च कृतम्।[26] अतः एतत् मन्तव्यम् उचितं यत् सर्वप्रथमम् अग्न्यादिभिः वेदमन्त्राणां दर्शनं कृतम्, अथ च प्रकटिताः तत्पश्चात् यैः धर्मात्मभिः योगिभिः महर्षिभिश्च मन्त्रार्थं ज्ञातुं इष्टिः कृता, तेषु समाधिस्थेषु योगिषु परमात्मकृपया मन्त्रार्थः प्रकाशितः।[27]

**उपनिषत्सु ऋषिपरम्परा** –

आसृष्टेः अद्यपर्यन्तम् अनेकर्षीणामागमनम् अस्यां धरायाम् अभवत्। वेदोपनिषत्पुराणरामायणमहाभारतादिग्रन्थेषु ऋषीणां चर्चा बहुत्र दृष्टिपथमुपैति। वेदेषु तु ये मन्त्रद्रष्टार आसन्, तेषामेव

चर्चा उपलभ्यते। वेदस्य संहिताभागे तेषां भौतिकजीवनव्यवहारः नोपलभ्यते, परम् उपनिषत्-रामायण-महाभारतादिग्रन्थेषु एतेषां ऋषीणां सुदीर्घा परम्परा उपलभ्यते। उपनिषद: अपि वेदानामेव अन्तिमभागरूपेण स्वीक्रियन्ते। महर्षिदेवर्षिराजर्षीणां परम्परा उपनिषत्सु शतपथादिग्रन्थेषु च बहुश: उपलभ्यते। उपर्युक्तत्रिविधर्षीणां मुख्यरूपेण उपनिषत्सु वर्णनानि प्राप्यन्ते।

**उपनिषत्सु महर्षि:-**

महर्षि: याज्ञवल्क्य: उपनिषद्युगस्य तत्त्वचिन्तक:, वाक्पटु:, ब्रह्मनिष्ठ:, क्रान्तदर्शी आचार्य: आसीत्। एष: महर्षिरुद्दालकारुणे: शिष्य: आसीत्।[28] बृहदारण्यकोपनिषद: द्वितीये तृतीये चतुर्थे चाध्याये विविधसंवादानां माध्यमेन अस्य महर्षे: तत्त्वचिन्तनम् अवबुध्यते। अस्योपनिषद: द्वितीयेऽध्याये याज्ञवल्क्यस्य ब्रह्मवादिन्या मैत्रेय्या पत्न्या सह तत्त्वज्ञानविषयक: संवाद: प्राप्यते। महर्षिणा याज्ञवल्क्येन विदेहराजजनकराजर्षिद्वारा आयोजितब्रह्मसभासु स्वतत्त्वज्ञानं बहुधा ख्यापितम्। अनेनैव महर्षिणा शुक्लयजुर्वेदस्य रचना कृता। अस्य मैत्रेयी कात्यायनी चेत्येते द्वे पत्न्यावास्ताम्। एष: गार्हस्थ्यजीवनं यापयन्नपि तत्त्वज्ञानी आत्मवेत्ता त्रिकालदर्शी चासीत् । अस्यालौकिकता उपनिषद्ग्रन्थेषु बहुश: दृष्टिगोचरा भवति।

**देवर्षि: नारद: -**

भारतीयज्ञानविज्ञानयो: मर्मज्ञस्य देवर्षिनारदस्य अथर्ववेदे असकृदुल्लेख उपलभ्यते।[29] एष: राज्ञो हरिश्चन्द्रस्य पुरोहित: आसीत्। अनेनैव पुरुषमेधयज्ञकरणाय हरिश्चन्द्राय परामर्श: प्रदत्त: इति ऐतरेयब्राह्मणेन ज्ञायते।[30] देवर्षि: नारद: एव पर्वतनामकेन आचार्येण सह आम्बष्ठे: एवं युद्धास्रौष्टे: राज्ञ: ऐन्द्रमहाभिषेकं कृतवान्।[31]

महर्षिणा नारदेन उपनिषद्युगस्य सर्वा:विद्या: अधिगता: आसन्। एष: शास्त्राणां प्रकाण्ड: पण्डित: आसीत्। छान्दोग्योपनिषदा ज्ञायते यत् एष: ऋग्यजु:सामाथर्ववेदानाम् पञ्चमवेदेतिहासपुराणानां च पित्र्यशुश्रूषाविज्ञानस्य, निधिशास्त्रादीनां समस्तविद्यानां अध्ययनम् अकार्षीत्।[32] एष: शास्त्रवेत्ता त्वासीत् परम् आत्मवेत्ता नासीत्। अनेन आत्मवेत्तु: ज्ञानं महर्षे: सनत्कुमारात् प्राप्तम्।

महाभारते अपि कथ्यते यत् नारद: वेदोपनिषदितिहासपुराणानां धर्मज्ञ:, शिक्षाकल्पव्याकरणायुर्वेदाद्याचार्याणां श्रेष्ठवक्ता, संगीतविशारद:षाड्गुण्यप्रयोगेषु सकलशास्त्रेषु च निपुण आसीत्। नारदस्य त्रिषु लोकेषु अव्याहतगतिरासीत्।[33]

**राजर्षिरश्वपति: -**

अश्वपति: केकयदेशस्य राजा आसीत्। एष: वैश्वानरविद्याया: ज्ञाता आसीत् । महाशाल: एकदा उद्दालकर्षि:

आत्मविषयकप्रश्नान् अपृच्छत्, तदानीम् उद्दालकर्षि: विचारितवान् यदहम् एतेषां सर्वेषां प्रश्नानाम् उत्तराणि दातुम् न शक्नोमि। अत: तेन महाशाल: अश्वपत्युः पार्श्वे प्रेषित:। अश्वपतिना तस्य अतिथिसत्कार: कृत:, तस्य शङ्कानान्च परिहारःविहितः।

**अश्वपतेः सुशासनव्यवस्था–**

एकदा अश्वपतिः प्रातरुत्थाय स्वयं महाश्रोत्रियर्षीणां पार्श्वे गत:। उक्तवाञ्च मम जनपदे कश्चिच्चौर: नास्ति न च कश्चन कृपण:, न मद्यप: न अनहिताग्नि: नाविद्वान्, न व्यभिचारी, न च व्यभिचारण्य:सन्ति।[34] राजा अश्वपतिवदेव राजा जनक:, अजातशत्र्वादय: अनेके राजर्षिपदवीम् अलङ्कुर्वाण: आसन्। सम्भवत: य: राजा राज्यं धर्मयुक्तनियमानाम् अनुसारेण सुशास्ति स्म, स एव राजा राजर्षिपदवीं प्राप्नोति स्म।

**रामायणेषु ऋषयः –**

वाल्मीकीयं रामायणं वेदसम्मित: ग्रन्थोऽस्ति।[35] वाल्मीकीयरामायणे ऋषीणाञ्चर्चा अनेकत्रोपलभ्यते। वाल्मीकि-रामायणमौखिकग्रन्थस्य वक्ता स्वयं वाल्मीकिरपि आदिकविः ऋषिश्चास्ति। ऋषिसम्बन्धे यास्कस्य उक्तिः **"ऋषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता"**[36] वाल्मीकौ चरितार्था भवति। अर्थात् "मन्त्रस्य अर्थस्य भावस्य वा आख्यानयुक्तशैल्यां प्रकटने ऋषीणां प्रीतिर्भवति"।वाल्मीकिः विषये एका दन्तकथा उपलभ्यते यत् वाल्मीकिः क्रूरः लुण्ठकः आसीत् सः वने निवसति स्म। सः जनेभ्यः धनानि लुण्ठति स्म, जनान् च व्यापादयति स्म। तस्य नाम तपस्यया कारणेन एव वल्मीकशरीरमयत्वात् वाल्मीकिरभवत्। वाल्मीकिः स्वतपोबलेनैव ऋषित्वम् आप्तवान्। वाल्मीकिरामायणेऽपि महर्षिदेवर्षिराजर्षीणां वर्णनान्यु पलभ्यन्ते। वाल्मीनान्युरामायणे ऋषित्वविषये तपोबलस्य अनेकत्र चर्चा उपलभ्यते। विश्वामित्र: तपोबलेनैव ऋषि-राजर्षि-महर्षि -ब्रह्मर्षिपदानि प्राप्तवान्।

**रामायणानुसारमृषित्वम् –**

**तपश्चरणसंसिद्धैरग्निकल्पैर्महात्मभि:।**
**सततं संकुलं श्रीमद्ब्रह्मकल्पैर्महात्मभि:॥**
**अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा।**
**फलमूलाशनैर्दान्तैर्जितदोषैर्जितेन्द्रियै:।**
**ऋषिभिर्बालखिल्यैश्च जपहोमपरायणै:॥**

**अन्यैर्वैखानसैश्चैव समन्तादुपशोभितम्।**[37]

ऋषयः भौतिकजीवने कीदृशं व्यवहारं चक्रिरे? ते कुत्र निवसन्ति स्म ? इत्यादिप्रश्नानां समुचितसमाधानं उपर्युक्तश्लोकैः वाल्मीकीयरामायणपरिशीलनेन ज्ञायते।

उपर्युक्तश्लोकैः ज्ञायते यत् ये ऋषयः वाल्मीकीयरामायणे उपलभ्यन्ते, ते जितेन्द्रियाः, फलमूलाशनाः, जपहोमपरायणाः, शीर्णपर्णाशिनाः तपोधनाः ब्रह्मनिश्च, आसन्।

**रामायणे ऋषिप्रकाराः–**

वाल्मीकीयरामायणेन केवलं ऋषीणां भौतिकजीवनस्य वर्ण मुपलभ्यते, अपितु ऋषीणां कर्मणामाधारेण एव तेषां प्रकाराःअपि निर्दिश्यन्ते–

**वैखानसा बालखिल्याः सम्प्रक्षाला मरीचिपाः।**
**अश्मकुटाश्च बहवः पात्रहाराश्च तापसाः॥**
**दन्तोलूखलिनश्चैव तथैवोन्मज्जकाः परे ।**
**गात्रशय्या अशय्याश्च तथैवानवकाशिकाः॥**
**मुनयः सलिलाहारा वायुभक्षास्तथा परे ।**
**आकाशनिलयाश्चैव तथा स्थण्डिलशायिनः॥**
**तथोर्ध्ववासिनो दान्तास्तथाऽऽर्द्रपटवाससः।**
**सजपाश्च तपोनिष्ठास्तथा पञ्चतपोऽन्विताः॥**[38]

- **वैखानसाः** –ऋषीणामेकःसमुदायःयस्योत्पत्तिःब्रह्मणःनखादभवत्।
- **बालखिल्याः**– ऋषीणामेकःसमुदायःयस्योत्पत्तिःब्रह्मणःरोमादभवत्।
- **सम्प्रक्षालाः**– ये भोजनं कृत्वा स्वपात्राणि संशोध्य स्थापयन्ति, अपरकालस्य कृते आदं न अवशेषयन्ति।
- **मरीचिपाः**– सूर्यस्य अथवा चन्द्रमसः मरीचीनां पानकर्ताराः।
- **अश्मकुट्टाः**– अपक्वान्नं पिष्ट्वा भोक्ताराः।
- **पात्राहाराः**– पत्रानाम् अत्ताराः।
- **दन्तोलूखलिनः**– दन्तैरेव उलूखलस्य कृत्यस्य कर्ताराः।

- **उन्मज्जका**ः– आकण्ठं निमज्ज्य तपसः कर्तारः।
- **गात्राशय्या**ः– ये शरीरमेव शय्यारूपेण प्रयोगं कुर्वन्ति।
- **अशय्या**ः– शय्यासाधनरहिताः।
- **अनवकाशिनः**– निरन्तरं सत्कर्मकराः
- **सलिल हारा**ः– अब्भक्षाः।
- **वायुभक्षा**ः– वायोः भोक्तारः।
- **आकाशनिलया**ः– परिधिरहितानां क्षेत्राणां वास्तव्याः।
- **स्थण्डिलशायिन**ः– वेद्यां शयितारः।
- **ऊर्ध्ववासिन**ः– पर्वतशिखराणां निवासिनः।
- **दान्ता**ः– जितेन्द्रियाः।
- **आर्द्रपटवासा**ः– आर्द्रवस्त्रधारिणः।
- **सजपा**ः– निरन्तरं जपस्य कर्तारः।
- **तपोनिष्ठा**ः–तपस्यायामथवा परमात्मतत्त्वविचारिणः।
- **पञ्चाग्निसेविन**ः– गीर्ष्मर्तौ अग्नेः तापस्य सोढारः।[39]

**विश्वामित्रस्य राजर्षित्वम्** –

महर्षेः वसिष्ठस्य ब्रह्मदण्डेन विश्वामित्रस्य सर्वाणि दिव्यास्त्राणि शक्तयश्च निराकृताः। पराजितः विश्वामित्रः ब्राह्मणत्वप्राप्त्यै घोरं तपः कर्तुमुद्यतो बभूव। तेन घोरतपसः व्रतं गृहीतम्, कन्दमूलानि भुक्त्वा सहस्रवर्षपर्यन्तं तपश्चर्या आचरिता। तदा लोकपितामहः ब्रह्मा तस्य समक्षं प्रादुरभूत्। तेन मधुरवाण्याम् उक्तम् – ''हे राजर्षे! त्वं घोरं तपः अतपत् दिव्यलोकाँश्च अजयत्। त्वं परमार्थरूपेण राजर्षिरसि'' एतदुक्त्वा ब्रह्मा अन्तहितः।[40]

ब्रह्मणः वचनं श्रुत्वा विश्वामित्रः अत्यन्तं लज्जितोऽभवत्। उक्तं च –''एतावत्याः घोरतपश्चर्यायाः अनन्तरमपि अहं राजर्षिः स्वीकृतः। अतः मया इतोऽप्यधिका तपश्चर्या कर्तव्या।'' तदनुसारं सः घोरं तपः प्रारब्धवान्।

राजर्षिः विश्वामित्रः सहस्रवर्षपर्यन्तं पुष्करक्षेत्रे घोरं तपः अतपत्। ब्रह्मा प्रसन्नः सन् देवताभिः सह तस्य पार्श्वे आगतवान् । उक्तञ्च त्वया स्वतपस्यया शुभकर्मभिश्च ऋषिपदं प्राप्तम्। अधुना त्वं राजा न असि। एवमुक्त्वा ब्रह्म

देवताभि: सह ब्रह्मलोकं गत:। पुन: स: विचारितवान् यत् मया महर्षिपदं न प्राप्तम्। अत: स: पुन: घोरं तप: अतपत्। किञ्चित्कालानन्तरं श्रेष्ठाप्सरा मेनका पुष्करक्षेत्रे स्नातुमागतवती। ऋषि: विश्वामित्र: तां सुन्दरीं दृष्ट्वा कामाभिभूत: सन् तया सह आश्रमे उषितवान्। दशवर्षपर्यन्तं सा तेन सह स्थितवती। विश्वामित्र: स्वकीयं तप: भ्रष्टमिति ज्ञात्वा ग्लानिमन्वभूत्। अन्ते स: मेनकां प्रेष्य स्वयं च उत्तरदिशि पर्वतेषु गतवान्।

**विश्वामित्रस्य महर्षित्वं ब्रह्मर्षित्वम्–**

विश्वामित्र: कौशिकीनद्यास्तटेएकसहस्रवर्षपर्यन्तं घोरं तप: तप्तवान्। तस्य तपस्यया प्रसन्न ब्रह्मा तं महर्षिरिति पदेन सम्बोधितवान् –

**“महर्षे! स्वागतं वत्स तपोऽग्रेण तोषित:।**
**महत्त्वमृषिमुख्यत्त्वं ददामि तव सुव्रत॥”**[41]

महर्षि: विश्वामित्र: ब्रह्मण: मधुरशब्दान् श्रुत्वा उक्तवान् – “पितामह! अहं स्वार्जितशुभकर्मभि: ब्रह्मर्षिपदं प्राप्तुमिच्छामि। भवता अहं महर्षिपदेन सम्बोधित: अनेन ज्ञायते यत् अहमिदानीं जितेन्द्रियो नास्मि।” अनन्तरं ब्रह्मणा उक्तं यत् सत्यमुक्तं भवता, त्वं जितेन्द्रियो नासि, प्रयत्न: कार्य:। यत्नेन त्वं जितेन्द्रियत्वम् आप्स्यसे। एवमुक्त्वा स: ब्रह्मलोकं गतवान्।

ब्रह्मण: गमनान्तरं महर्षि: विश्वामित्र: घोरतपश्चर्यामाचरितवान्। केवलं वायुं पीत्वा एव जीवनयापनम् अकरोत्। एतम् एव क्रमं सहस्रवर्षपर्यन्तं आचरितवान्। तस्य परीक्षायै इन्द्रेण तस्य पार्श्वे अप्सरा रम्भा प्रेषिता। विश्वामित्र: शङ्कित: सन् रम्भायां कुपित:, तस्यै शापं दत्तवान्। विश्वामित्र: शापं दत्त्वा आत्मनि ग्लानिम् अनुभूतवान्, निश्चयं च कृतवान् यदहं कदापि क्रोधं न करिष्यामि, न च केनापि सह वक्ष्यामि। अहमिन्द्रियै: पराजयमनुभवामि। अत: अहमधुना श्वासमपि न नेष्यामि। सः जलान्नाभ्यां विना सहस्रवर्षपर्यन्तं तपस्यां कृतवान्।[42]

ब्रह्मा देवताभिः सह पार्श्वे गत: उक्तवाञ्च ब्रह्मर्षे! स्वागतं भवतां अत्रभवता स्वतपश्चर्यया सर्वे देवा: तुष्टीकृता: भवता स्वतपोबलेन ब्राह्मणत्वं दीर्घायुष्यञ्च प्राप्ते। भवान् यथेच्छमाचरितुं शक्नोति।[43]

**देवर्षि: नारदः –**

वाल्मीकीयरामायणे बालकाण्डे एव देवर्षिनारदविषये वर्णनमुपलभ्यते । वाल्मीकि: देवर्षिनारदात् सर्वगुणसम्पन्नमनुष्यस्य विषये पृच्छति। यतोहि देवर्षिनारद: सर्ववेत्ता अथ च तेन समस्तविद्यानाम् अध्ययनं कृतमासीत्

अपि च देवर्षिनारदस्य सर्वत्र गमनागमने अव्याहतेः आस्ताम्। वाल्मीकिना नारदस्य कृते त्रिलोक्या ज्ञाता इति विशेषणस्य प्रयोगः कृतोऽस्ति।[44]

**निष्कर्षः –**

वैदिकसाहित्ये लौकिकसाहित्ये च ऋषीणां तपसः महिमा बाहुल्येन दृश्यते। **ऋतं तपः, सत्यं तपः, स्वाध्यायस्तपः,दमस्तपः, ब्रह्मचर्यं तपः।**[45] उचितस्य आचरणमपि तपः एव । महाभारते युधिष्ठिरः उवाच **"तपः स्वकर्मवर्तित्वं तपः स्वधर्मवर्तित्वम्"**[46] अर्थात् ये जनाः स्वधर्मे कर्मणि च रताः सन्ति ते ऋषयः।

वेदरामाययोः उभयत्र ऋषित्वस्य विचारः दृश्यते । उभयत्र ऋषित्वसङ्कल्पनायां भेदो न अवलोक्यते । यथा वेदेषूपलभ्यते यत् ऋषयः तपश्चर्याम् आचरितवन्तः, दीक्षां गृहीतवन्तः । अथर्ववेदे अस्मिन् विषये सन्दर्भरूपेण मन्त्रांशः उपलभ्यते –

**"ऋषयः स्वर्विदस्तपोदीक्षाम् उपनिषेदुरग्रे"**[47]

वेदानां मन्त्रद्रष्टारः[48] स्वतपोबलेन मन्त्रान् ददृशुः । तपश्चर्यया एव क्रान्तद्रष्टृत्वमाप्तवन्तः । रामायणेऽपि सर्वत्र अवलोक्यते यत् येऽपि ऋषयः राजर्षयः देवर्षयः महर्षयः सन्ति, ते सर्वेऽपि स्वजीवने तपः आचरितवन्तः । यथा रामायणस्य कर्ता महर्षिः वाल्मीकिः स्वतपोबलेन एव समाधौ रामस्य सम्पूर्णजीवनवृत्तान्तमवलोकितवान् । महर्षिः वाल्मीकिः साहित्यग्रन्थेषु कविः उच्यते वेदेषु च कविरेव[49] ऋषिः। रामायणे विश्वामित्रः अपि स्वतपोबलेन एव ऋषित्वं राजर्षित्वं महर्षित्वञ्च आप्तवान् , अतः वक्तुं शक्यते यत्तपसः दृष्ट्या वेदरामाययोः ऋषित्वसङ्कल्पनायां भेदो नास्ति।

**सन्दर्भ**


1 ऋक् सर्वार्थनुक्रमणी २.४; यस्य वाक्यं स ऋषिः, निरुक्त २.११; ऋषिर्दर्शनात्

2 ऋक् सर्वार्थनुक्रमणी २.५; या तेनोच्यते सा देवता।, वेदार्थ-दीपिका २.५; तेव वाक्येन यत् प्रतिपाद्यं वस्तु सा देवता।

3 ऋक् सर्वार्थनुक्रमणी २.६; यद् अक्षरपरिमाणं तच्छन्दः।

4 तुलना करो- निरुक्त ७.३; एवम् उच्चावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति।

5 निरुक्तम् २.११; ऋषिर्दर्शनात्। स्तोमान् ददर्शेत्यौपमन्यवः।

6 आख्यातिकम् गतयस्त्रयोऽर्थाः ज्ञान-गमन-प्राप्तिः।

7 निरुक्तम् २.११ "तद् यदेनांस्तपस्यमानन् ब्रह्म स्वयम्भ्वानर्षत्, तद् ऋषीणाम् ऋषित्वम्" इति विज्ञायते।

8 शतपथब्राह्मणम् ६.१.१.१

9 निरुक्तम् १.२०

10 स्कन्दमाहेश्वर-विरचिता निरुक्तभाष्य टीका, भाग १ पृ० ११३-१४
11 दुर्गाचार्यकृत-टीका-समवेतं निरुक्तम् भाग १, पृ० ११४
12 बृहद्देवता, २.२८, संवादेस्वाहवाक्यं य: स तु तस्मिन् भवेत् ऋषि:
13 वाचस्पत्यस्य निम्नश्लोके उभयस्तरे प्रति संकेत: क्रियते।

येन यद् ऋषिना दृष्टं सिद्धि: प्राप्ता च येन वै।
मन्त्रेन तस्य तत् प्रोक्तं ऋषिभाव: स उच्यते

14 निरुक्त १.२०. ते अवरेभ्योऽसाक्षात्कृत् धर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः।
15 ऋग्वेद.६.१६.२, अग्निरिद्धि प्रचेता अग्निर्वेदस्तम ऋषि:
16 ऋग्वेद ५.२९.१ अर्चन्ति त्वा मरुत: पूतदक्षास्त्वमेषामृषिरिन्द्रासि धीर:।
17 जैमिनिय ब्राह्मण २.२६६, ऋषिर्ह स्म मन्त्रकृत ब्राह्मण आजायते।
18 मैत्रायणी संहिता ४.१.२, ऋषय: कवय:।
19 ऋग्वेद १.१८२.२
20 तत्रैव. ९.८६
21 सर्वानुक्रमणी सूत्र, पृ. १
22 शतपथ ११.५.८.१-३
23 मनु १.२३
24 सत्यार्थप्रकाश (शताब्दी संस्करण, १९७२) पृ. २९६
25 श्वेताश्वेतरो. ६१८
26 ऋग्वेदादिभाष्यभूमिका पृ. २१
27 सत्यार्थप्रकाश सप्तमसमुल्लास
28 बृह.उप. ६.३.७
29 कठ. २.५
30 ऐ.ब्रा. ७.१३
31 तत्रैव
32 छा.उ. ७.१.२
33 महाभारत आदि.प. १.११
34छा.उ. ५.११.५
35 वा.रा. बालकाण्ड ४.६-७
36निरुक्त १०.१०.४२
37 वा.रा.बाल. ५२.२५-२८
38वा.रा. अरण्यकाण्ड ६.२-५
39 वा.रा. अरण्यकाण्ड ६.२-५
40 वा.रा. बालकाण्ड ५६.१७-२४
41 वा.रा. बालकाण्ड ६३.१८-१९
42 वा.रा.बाल. ६४.१९-२०
43 वा.रा.बाल. ६६.१२-२०
44वा.रा.बाल. १.६
45 वेद वैभव ले० उमाकन्त उपाध्याय, आर्य समाज कोलकाता, २००२
46 वेद वैभव ले० उमाकन्त उपाध्याय, आर्य समाज कोलकाता, २००२
47 अथर्ववेद.१९.४२.१
48 ऋषयो मन्त्रद्रष्टारः
49 मैत्रायणी संहिता ४.१.२, ऋषय: कवय:।